श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## UG-11.14- तृतीय सोपान



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

**नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।**

**देवीं(म्) सरस्वतीं(वँ) व्यासं(न्), ततो जयमुदीरयेत्॥**

**नामसङ्कीर्तनं(यँ) यस्य, सर्वपापप्रणाशनम्।**

**प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्॥**

**श्रीमद्भागवतमहापुराणम्**

**एकादशः स्कन्धः**

**अथ चतुर्दशोऽध्यायः**

## उद्धव उवाच

**वदन्ति कृष्ण श्रेयां(म्)सि, बहूनि ब्रह्मवादिनः ।**

**तेषां(वँ) विकल्पप्राधान्य - मुताहो एकमुख्यता ॥ 1॥**

विकल्प+प्राधान्य

**भवतोदाहृतः(स्) स्वामिन्, भक्तियोगोऽनपेक्षितः ।**

**निरस्य सर्वतः(स्) सं(ङ्)गं(यँ), येन त्वय्याविशेन्मनः ॥ 2॥**

भवतो+ दाहृतः(स्), भक्तियोगोऽ+ नपेक्षितः

त्वय्या+विशेन्+मनः

**श्रीभगवानुवाच**

**कालेन नष्टा प्रलये, वाणीयं(वँ) वेदसं(ञ्)ज्ञिता ।**

**मयाऽऽदौ ब्रह्मणे प्रोक्ता, धर्मो यस्यां(म्) मदात्मकः ॥ 3॥**

**तेन प्रोक्ता च पुत्राय, मनवे पूर्वजाय सा ।**

**ततो भृग्वादयोऽगृह्णन् , सप्त ब्रह्ममहर्षयः ॥ 4॥**

भृग्वा + दयोऽ + गृह् + णन्

**तेभ्यः(फ्) पितृभ्यस्तत्पुत्रा, देवदानवगुह्यकाः ।**

**मनुष्याः(स्) सिद्धगन्धर्वाः(स्), सविद्याधरचारणाः ॥ 5॥**

पितृभ्यस् + तत्पुत्रा, देव+ दानव+ गुह्यकाः, सविद्या + धरचारणाः

**किं(न्)देवाः(ख्) किन्नरा नागा, रक्षः(ख्) किम्पुरुषादयः ।**

**बह्व्यस्तेषां(म्) प्रकृतयो, रजः(स्)सत्त्वतमोभुवः ॥ 6॥**

किम् + पुरुषादयः, बह् + व्यस् +तेषां , रजः(स्)+ सत् + त्वतमो + भुवः

**याभिर्भूतानि भिद्यन्ते, भूतानां(म्) मतयस्तथा ।**

**यथाप्रकृति सर्वेषां(ञ्), चित्रा वाचः(स्) स्रवन्ति हि ॥ 7॥**

याभिर्+ भूतानि

**एवं(म्) प्रकृतिवैचित्र्याद् - भिद्यन्ते मतयो नृणाम् ।**

**पारम्पर्येण केषाञ्चित् - पाखण्डमतयोऽपरे ॥ 8॥**

प्रकृति + वैचित्र्याद् ,पारम् + पर्येण, पाखण्ड + मतयोऽ+ परे

**मन्मायामोहितधियः(फ्), पुरुषाः(फ्) पुरुषर्षभ ।**

**श्रेयो वदन्त्यनेकान्तं(यँ), यथाकर्म यथारुचि ॥ 9॥**

मन्माया + मोहित + धियः(फ्), वदन्त्य+ नेकान्तं(यँ)

**धर्ममेके यशश्चान्ये ,कामं(म्) सत्यं(न्) दमं(म्) शमम् ।**

**अन्ये वदन्ति स्वार्थं(वँ) वा, ऐश्वर्यं(न्) त्यागभोजनम् ।।10।।**

यशश्+ चान्ये

केचिद् यज्ञतपोदानं(वँ), व्रतानि नियमान् यमान् ।

आद्यन्तवन्त एवैषां(लँ), लोकाः(ख्) कर्मविनिर्मिताः ।

दुःखोदर्कास्तमोनिष्ठाः(ह), क्षुद्रानन्दाः(श्) शुचार्पिताः ॥ 11॥

दुःखोदर् +कास् +तमोनिष्ठाः(ह)

मय्यर्पितात्मनः(स्) सभ्य, निरपेक्षस्य सर्वतः ।

मयाऽऽत्मना सुखं(यँ) यत्तत् , कुतः(स्) स्याद् विषयात्मनाम् ॥ 12॥

मय्यर् + पितात् + मनः,विषयात् + मनाम्

अकिं(ञ्)चनस्य दान्तस्य, शान्तस्य समचेतसः ।

मया सन्तुष्टमनसः(स्), सर्वाः(स्) सुखमया दिशः ॥ 13॥

सन्तुष्ट+ मनसः(स्)

न पारमेष्ठ्यं(न्) न महेन्द्रधिष्ण्यं(न्),

न सार्वभौमं(न्) न रसाधिपत्यम् ।

न योगसिद्धीरपुनर्भवं(वँ) वा,

मय्यर्पितात्मेच्छति मद् विनान्यत् ॥ 14॥

योगसिद्धी+ रपुनर् + भवं(वँ), मय्यर् + पितात् + मेच्छति

न तथा मे प्रियतम, आत्मयोनिर्न शं(ङ्)करः ।

न च सं(ङ्)कर्षणो न श्रीर्- नैवात्मा च यथा भवान् ॥ 15॥

आत्म+ योनिर्+ न

निरपेक्षं(म्) मुनिं(म्)  शान्तं(न्), निर्वैरं(म्) समदर्शनम् ।

अनुव्रजाम्यहं(न्) नित्यं(म्), पूयेयेत्यङ्घ्रिरेणुभिः ॥ 16॥

अनु+ व्रजाम्+ यहं(न्) , पूयेयेत्+ यङ्घ्रिरे+ णुभिः

निष्किञ्चना मय्यनुरक्तचेतसः(श्),

शान्ता महान्तोऽखिलजीववत्सलाः ।

कामैरनालब्धधियो जुषन्ति यत्,

तन्नैरपेक्ष्यं(न्) न विदुः(स्) सुखं(म्) मम ॥ 17॥

मय्यनु+ रक्त+ चेतसः(श्),महान्तोऽ+ खिल+ जीववत्सलाः

कामै+ रनालब्ध+ धियो, तन्नै+ रपेक्ष्यं(न्)

**बाध्यमानोऽपि मद्भक्तो, विषयैरजितेन्द्रियः ।**

**प्रायः(फ्) प्रगल्भया भक्त्या, विषयैर्नाभिभूयते ॥ 18॥**

बाध्य+ मानोऽपि, विषयै+ रजितेन्द्रियः, विषयैर्+ नाभि+ भूयते

**यथाग्निः(स्) सुसमृद्धार्चिः(ख्), करोत्येधां(म्)सि भस्मसात् ।**

**तथा मद्विषया भक्ति- रुद्धवैनां(म्)सि कृत्स्नशः ॥ 19॥**

सुसमृद्+ धार्चिः(ख्), **करोत्ये+ धां(म्)सि ,रुद्धवै+ नां(म्)सि**

**न साधयति मां(यँ) योगो, न सां(ङ्)ख्यं(न्) धर्म उद्धव ।**

**न स्वाध्यायस्तपस्त्यागो, यथा भक्तिर्ममोर्जिता ॥ 20॥**

स्वाध्या+ यस्तपस् + त्यागो, भक्तिर्+ ममोर्+ जिता

**भक्त्याहमेकया ग्राह्यः(श्), श्रद्धयाऽऽत्मा प्रियः(स्) सताम् ।**

**भक्तिः(फ्) पुनाति मन्निष्ठा, श्वपाकानपि सम्भवात् ॥ 21॥**

भक्त्या+ हमेकया, श्वपाका+ नपि

**धर्मः(स्) सत्यदयोपेतो, विद्या वा तपसान्विता ।**

**मद्भक्त्यापेतमात्मानं(न्), न सम्यक् प्रपुनाति हि ॥ 22 ॥**

सत्य+ दयोपेतो, मद् +भक्त्या +पेत + मात्मानं(न्)

**कथं(वँ) विना रोमहर्षं(न्), द्रवता चेतसा विना ।**

**विनाऽऽनन्दाश्रुकलया, शुध्येद् भक्त्या विनाऽऽशयः ॥ 23॥**

विनाऽऽ +नन्दा+श्रुकलया

**वाग् गद्गदा द्रवते यस्य चित्तं(म्),**

**रुदत्यभीक्ष्णं(म्) हसति क्वचिच्च ।**

**विलज्ज उद्गायति नृत्यते च,**

**मद्भक्तियुक्तो भुवनं(म्) पुनाति ॥ 24॥**

रुदत् + यभीक्ष्णं(म्), मद् + भक्ति + युक्तो

**यथाग्निना हेम मलं(ञ्) जहाति,**

**ध्मातं(म्) पुनः(स्) स्वं(म्) भजते च रूपम् ।**

**आत्मा च कर्मानुशयं(वँ) विधूय,**

**मद्भक्तियोगेन भजत्यथो माम् ॥ 25॥**

कर्मा+ नुशयं(वँ)

**यथा यथाऽऽत्मा परिमृज्यतेऽसौ,**

**मत्पुण्यगाथाश्रवणाभिधानैः ।**

**तथा तथा पश्यति वस्तु सूक्ष्मं(ञ्),**

**चक्षुर्यथैवां(ञ्)जनसम्प्रयुक्तम् ॥ 26॥**

मत् + पुण्य +गाथा+ श्रवणा + भिधानैः,

चक्षुर् + यथैवां(ञ्)+जनसम् + प्रयुक्तम्

**विषयान् ध्यायतश्चित्तं(वँ), विषयेषु विषज्जते ।**

**मामनुस्मरतश्चित्तं(म्), मय्येव प्रविलीयते ॥ 27॥**

ध्यायतश्+ चित्तं(वँ), मामनुस् + मरतश् + चित्तम्

**तस्मादसदभिध्यानं(यँ), यथा स्वप्नमनोरथम् ।**

**हित्वा मयि समाधत्स्व, मनो मद्भावभावितम् ॥ 28॥**

तस्मा+ दसद+ भिध्यानं(यँ),

स्वप्न+ मनोरथम् , मद्+ भाव+ भावितम्

**स्त्रीणां(म्) स्त्रीसं(ङ्)गिनां(म्) सं(ङ्)गं(न्), त्यक्त्वा दूरत आत्मवान् ।**

**क्षेमे विविक्त आसीनश्- चिन्तयेन्मामतन्द्रितः ॥ 29॥**

चिन्तयेन् + माम+ तन्द्रितः

**न तथास्य भवेत् क्लेशो, बन्धश्चान्यप्रसं(ङ्)गतः ।**

**योषित्सं(ङ्)गाद् यथा पुं(म्)सो, यथा तत्सं(ङ्)गिसं(ङ्)गतः ॥ 30॥**

बन्धश्+ चान्य+ प्रसं(ङ्)गतः

**उद्धव उवाच**

**यथा त्वामरविन्दाक्ष, यादृशं(वँ) वा यदात्मकम् ।**

**ध्यायेन्मुमुक्षुरेतन्मे, ध्यानं(न्) त्वं(वँ) वक्तुमर्हसि ॥ 31॥**

त्वा+ मर+ विन्दाक्ष , ध्यायेन्+ मुमुक्षु+ रेतन्मे

**श्रीभगवानुवाच**

**सम आसन आसीनः(स्), समकायो यथासुखम् ।**

**हस्तावुत्सं(ङ्)ग आधाय, स्वनासाग्रकृतेक्षणः ॥ 32॥**

स्वनासा+ ग्रकृते+ क्षणः

**प्राणस्य शोधयेन्मार्गं(म्), पूरकुम्भकरेचकैः ।**

**विपर्ययेणापि शनै- रभ्यसेन्निर्जितेन्द्रियः ॥ 33॥**

पूर + कुम्भ + करेचकैः, रभ्य + सेन् + निर् + जितेन्द्रियः

**हृद्यविच्छिन्नमों(ङ्)कारं(ङ्), घण्टानादं(म्) विसोर्णवत् ।**

**प्राणेनोदीर्य तत्राथ, पुनः(स्) सं(वँ)वेशयेत् स्वरम् ॥ 34॥**

हृद्य+ विच्+ छिन्+ नमों(ङ्)कारं(ङ्),

विसोर्+ णवत् ,प्राणेनो+ दीर्य

**एवं(म्)  प्रणवसं(यँ)युक्तं(म्), प्राणमेव समभ्यसेत् ।**

**दशकृत्वस्त्रिषवणं(म्), मासादर्वाग् जितानिलः ॥ 35॥**

प्रणव+ सं(यँ)युक्तं(म्) , दशकृत् + वस्+ त्रिषवणं, मासादर्+ वाग्

**हृत्पुण्डरीकमन्तः(स्)स्थ-  मूर्ध्वनालमधोमुखम् ।**

**ध्यात्वोर्ध्वमुखमुन्निद्र - मष्टपत्रं(म्) सकर्णिकम् ॥ 36॥**

हृत् +पुण्डरी+कमन्तः+स्थ , मूर् +ध्वनाल +मधोमुखम् ,

ध्यात् +वोर्ध्व +मुखमुन् +निद्र

**कर्णिकायां(न्) न्यसेत् सूर्य - सोमाग्नीनुत्तरोत्तरम् ।**

**वह्निमध्ये स्मरेद् रूपं(म्), ममैतद् ध्यानमं(ङ्)गलम् ॥ 37॥**

सोमाग्नी+ नुत्+ तरोत्+ तरम्

समं(म्) प्रशान्तं(म्) सुमुखं(न्), दीर्घचारुचतुर्भुजम् ।
सुचारुसुन्दरग्रीवं(म्), सुकपोलं(म्) शुचिस्मितम् ॥ 38॥

दीर्घ+ चारु+ चतुर्भुजम् , सुचारु+ सुन्दर+ ग्रीवं(म्)

समानकर्णविन्यस्तस् - फुरन्मकरकुण्डलम् ।
हेमाम्बरं(ङ्) घनश्यामं(म्), श्रीवत्सश्रीनिकेतनम् ॥ 39॥

समा+ नकर्ण+ विन्यस्तस् , फुरन्+ मकर+ कुण्डलम् ,श्रीवत्स+ श्रीनिकेतनम्

शं(ङ्)खचक्रगदापद्म - वनमालाविभूषितम् ।
नूपुरैर्विलसत्पादं(ङ्), कौस्तुभप्रभया युतम् ॥ 40॥

शं(ङ्)ख+ चक्र+ गदा+ पद्म ,नूपुरैर्+ विलसत्+ पादं(ङ्)

द्युमत्किरीटकटक - कटिसूत्रां(ङ्)गदायुतम् ।
सर्वां(ङ्)गसुन्दरं(म्) हृद्यं(म्), प्रसादसुमुखेक्षणम् ।
सुकुमारमभिध्यायेत् - सर्वां(ङ्)गेषु मनो दधत् ।।41।।

द्युमत्+ किरीट+ कटक , प्रसाद+ सुमुखे+ क्षणम् ,सुकुमा+रमभि+ ध्यायेत्

इन्द्रियाणीन्द्रियार्थेभ्यो, मनसाऽऽकृष्य तन्मनः ।
बुद्ध्या सारथिना धीरः(फ्), प्रणयेन्मयि सर्वतः ॥ 42॥

इन्द्रिया+ णीन्द्रि+ यार्थेभ्यो , मनसाऽऽ+ कृष्य ,प्रणयेन्+ मयि

तत् सर्वव्यापकं(ञ्) चित्त - माकृष्यैकत्र धारयेत् ।
नान्यानि चिन्तयेद् भूयः(स्), सुस्मितं(म्) भावयेन्मुखम् ॥ 43॥

माकृष्यै+ कत्र, भावयेन्+ मुखम्

तत्र लब्धपदं(ञ्) चित्त - माकृष्य व्योम्नि धारयेत् ।
तच्च त्यक्त्वा मदारोहो, न किं(ञ्)चिदपि चिन्तयेत् ॥ 44॥

एवं(म्) समाहितमतिर् - मामेवात्मानमात्मनि ।
विचष्टे मयि सर्वात्मन्, ज्योतिर्ज्योतिषि सं(यँ)युतम् ॥ 45॥

मामेवात्मा+ नमात्मनि ,ज्योतिर्+ ज्योतिषि

**ध्यानेनेत्थं(म्) सुतीव्रेण, युं(ञ्)जतो योगिनो मनः ।**

**सं(यँ)यास्यत्याशु निर्वाणं(न्), द्रव्यज्ञानक्रियाभ्रमः ॥ 46॥**

ध्याने+ नेत्थं(म्), सं(यँ)यास्+ यत्याशु , द्रव्य+ ज्ञान+ क्रियाभ्रमः

**इति श्रीमद्भागवते महापुराणे पारमहं(म्)स्यां(म्)**

**सं(म्)हितायामेकादशस्कन्धे चतुर्दशोऽध्यायः ॥ 14॥**

**ॐ पूर्णमदः(फ्) पूर्णमिदं(म्)पूर्णात्पूर्णमुदच्यते**

**पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।**

**ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः।।**

